National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 167-169
© 2025 NJHSR
www.sanskritarticle.com

**Rajlaxmi Goud**
Department of Sahitya,
National Sanskrit University,
Tirupati

**Correspondence:**
**Rajlaxmi Goud**
Department of Sahitya,
National Sanskrit University,
Tirupati

# श्रीमथुरानाथशास्त्रिणः प्रायोगिकशैलीनां विवेचनम्

**राजलक्ष्मी गौड**

**प्रयोगः** मनुष्यमात्रस्य सहजप्रवृत्तिः अस्ति। यावत् जीवितस्य इतिहासः प्राचीनः, तावत् प्रयोगस्य अपि इतिहासः प्राचीनः एव। यदा जीवनस्य परम्पराः काचित् अथवा अनेकांशतः रूढाः, गतिहीनाः, जर्जराः च भवन्ति, तदा ते जीर्णांशाः नूतनपरम्परया अथवा प्रयोगेण प्रतिस्थाप्यन्ते। एषा सहजप्रक्रिया इतिहासस्य च अनिवार्यता अस्ति। एतत् नूतनसन्दर्भैः, नूतनमूल्यैः, नूतनबोधैः, नूतनपरिवेशेन च सम्भवति। साहित्यधारायाः अपि एषा एव गतिर्भवति। यदा यदा साहित्ये परम्पराः रूढाः भवन्ति, अर्थाः धूमिलाः सन्ति, शिल्पस्य उपकरणानि घृष्टानि कुन्दानि च भवन्ति, भाषा च निस्तेजा जायते, तदा तदा साहित्यं स्वं जडताम् अस्मात् मुक्तं करोति । वदन्ति-काव्यस्य अपि कालकालान्तरे मुक्तिर्भवति।एवमेव क्रान्तदर्शी कविः काव्यस्य पूर्ववर्ती अग्राह्यप्रतिमानान् निराकृत्य अभिनववस्तुविन्यासेन नवं शिल्पप्रकल्पं च स्वीकरोति, येन सः स्वकाव्ये किमपि नूतनं सन्निवेशयति, ततः काव्यम् नूतनया स्फूर्त्या नूतनया च सञ्चेतनया सह जीवितं भवति। एतदेव 'तादृशं किमपि सन्निवेशयितुम्' प्रयोगः इत्युच्यते।

**इतिहासः** साक्षी अस्ति यत् यदा वैदिकसाहित्यं श्लथं शिथिलं च अभवत्, तदा आदिकविना वाल्मीकिना सह संस्कृतसाहित्यं प्रथमवारं परिवर्तितम्। तदनन्तरं कालिदासस्य नेतृत्वे संस्कृतकवितायाः पृथग्भूता सुगन्धिः माधुर्यं च लब्धं, यस्य अनुभूतिः सहस्रवर्षपर्यन्तं अनुभवनीयाऽभवत्। अनन्तरं गीतगोविन्दकर्त्रा जयदेवेनेव पुनः किञ्चित् नूतनं प्रस्तुतम्। कविशिरोमणिना भट्टमथुरानाथशास्त्रिणा सह संस्कृतकविता पुनरपि नवमार्गस्य अनुसन्धानं करोति। अवधेयं यत्, एतेषु सर्वेषु परिवर्तनबिन्दुषु मेधावी कवेः दृष्टिः बोधश्च नित्यं विद्यमान एव आसीत्।

येषु दिनेषु भट्टमहाभागः संस्कृतकविताक्षेत्रे प्रविष्टवान्, तेषु दिनेषु तस्य पुरतः द्वे विकटाह्वानम्आस्ताम्। एकं तु — ब्रजबाषाकवीनां कवितानां च मोहिनीशक्ति राजद्वारात् आरभ्य जनद्वारपर्यन्तं शिरसि आरोहति स्म। किन्तु ब्रजबाषाया महाकवयः (ये प्राकृतअपभ्रंशयोः अपि अनुगामिनः आसन्) ते न केवलं विषयवस्तुमात्रं, अपि तु संस्कृतशब्दानाम् आहरणं स्वभाववत् अकुर्वन्। एषा विस्मयजनकः वस्तु यत् ब्रजबाषाकविभिः संस्कृतसाहित्यं सर्वात्मना स्वीकृत्यापि छन्दसःविषये पृथक् मार्गः स्वीकृतः। तेषां प्रियछन्दांसि आसन् — दोहा, चौपायी, सवैया, छप्पयः, कुण्डलिका, अमृतध्वनिः, घनाक्षरी, कवित्तादयः।कविभिः काव्येषु नानाप्रकारेण लोचं मार्दवं च स्थाप्य, अनुप्रासादिशब्दालंकाराणां झंकारं जनयित्वा, एकत्र नानार्थसंविधानं कृत्वा जनमानसं सम्यक् मोहितं कृतम्।

द्वितीयं ब्रजबाषाकवितायाः लोकप्रियतायाः विपरीतं संस्कृतकवितायाः धारा विषयरूपयोः उभयत्र अपि क्षीणत्वं प्राप्तवती आसीत्। एषा भ्रान्तिः प्रसारिताभवत् यत् संस्कृतभाषा नियमानां बन्धनेन अतिशयेन बद्धा अस्ति, येन सा लोकोपयोगिन्या भाषायाः सदृशं साहित्यनिर्माणे, युगानुरूपे नूतने भावविचारयथार्थप्रकाशने च असमर्था जाता इति। इयं भाषा इदानीं क्षीणा, मृताभूता इति अपि अभ्यधीयत। एतादृशे विकटे समये सुकविः भट्टमथुरानाथशास्त्री अवतीर्णः अभवत्।

उपर्युक्ते समस्याद्वयंसमक्षीकृत्य शास्त्रीमहोदयस्य रचनानां मर्ममूल्ययोः अवलोकनं करणीयम्। समस्याद्वयं सम्यक् निरासयितुं सः स्वस्य करिश्मायुक्तेन व्यक्तित्वेन विलक्षणया प्रतिभया च काव्यस्य वस्तु, शिल्प, भाषा – एतेषां त्रयाणामपि स्तराणां विषये अभिनवप्रयोगान् करोति। तेन नूतनसाधननवीनशैलीयोः तादृशं प्रयोगं कृतम्, यः संस्कृतेः इतिहासे पूर्वं कदापि न दृष्टः। अस्य परिणामेन

संस्कृतकविता पुनरपि जीवितत्वं प्राप्तवती इव दृश्यते। एषा अनुभूतिः तस्य सर्वासु रचनासु पदे पदे अनुभूयते।

**वस्तुस्तरस्य प्रयोगः**

श्रीशास्त्रीमहोदयः स्वकाव्येषु प्रायः मुक्तकानि कुलकानि च एव रचितवान्। तस्य कवितानां प्रतिनिधिग्रन्थाः सन्ति — "जयपुरवैभवम्", "साहित्यवैभवम्", "गोविन्दवैभवम्" इति। एतेषु वैभवनामकेषु ग्रन्थेषु केवलं मङ्गलाचरणं परम्परागतं दृश्यते, अन्यानि तु सर्वाणि कथ्यानि नूतनानि सन्ति, यत्र युगचित्रं व्यक्तिचित्रं च परिलक्षितम्। एतेषु चित्रेषु तद्युगीनदर्शनस्य सञ्चेतनायाश्च सूक्ष्मा अभिव्यक्तिः द्रष्टुं शक्यते, यत्र कवेर् नवीना दृष्टिः युगबोधश्च स्पष्टतया प्रकाशते।यः कथ्यं रूपं च ब्रजबाषाकवीनां रचनाकेन्द्रे आसन्, येषु पाठकाः श्रोता च हर्षविह्वलाः भूत्वा नृत्यन्ति स्म, तानि भट्टमहोदयः स्वयुगानुरूपेण तैः एव भङ्गिमाभिः सह स्वनवीनशैलीना संस्कृते प्रतिष्ठाप्य संस्कृतभाषायाः सामर्थ्यं प्रमाणीकृतवान्। जयपुर-वैभवम्ग्रन्थात् उदाहरणम् —

**अहह निशम्यतां सवाद्यसहनायीस्वरो**
**रुचिर 'हवाई' ध्वनिर्दूरतः प्रतीक्ष्यताम्**
**मध्यतः प्रविश्य सखे दृश्या वरयात्रिच्छटा**
**नृत्ये निकटाऽऽगतापि गणिकेयमीत्यताम् ।**
**मध्येसभं निन्दतां च वालकविवाहमहो !**
**भव्यवरवेपवहो वालोऽसौ निरीक्ष्यताम्**
**पात्राऽपात्रनिःस्पृहा सुभूरिधनमात्राव्यया**
**जयपुरविवाहवरयात्राऽसौ समीक्ष्यताम्॥**[1]

अत्रवरयात्रायाःमहत्तमं सहजचित्रणं दृष्टं वर्तते। भव्यतया प्रदत्तेविवाहशोभायात्रायाः उपरि कवेर् प्रभूतधनव्ययस्य अपकर्षः अपि अनुभव्यमानः। एवं मार्मिकसजीवचित्रणैः "जयपुरवैभवम्" सम्पूर्णं पूरितम्। एषु चित्रेषु नगरस्य, नगरेषु, राजद्वारस्य वा, उत्सवस्य वा उद्यानस्य वा दृश्याः सर्वत्र समाविष्टाः सन्ति।

"साहित्यवैभवम्"ग्रन्थस्य "नवयुगवीथी" अंशे कविना नवयुगस्य वैज्ञानिकआविष्काराणां उपकरणानां च स्फुटं चित्रणं कृतम्, यत् कवेर् प्रयोगशीलदृष्टेः स्पष्टं द्योतनं करोति। उदाहरणार्थं रेडियो (आकाशवाणी) इत्यस्य एकं चित्रणंपश्यामः –

**गेहेयनिघायधीरगम्भीरयास्पष्टगिरा**
**गीतीर्वक्तृताथनराःशृण्वन्त्यनियन्त्रकम्**
**वैज्ञानिकयत्रमिदंभारतभूभारेकिमु**
**पारेपारावारेऽप्युक्तनिगदनिमन्त्रकम्।**
**मञ्जुनाथ विमृश यदेपा दारुमञ्जूपाऽपि**
**प्राक्पण्डितपिश्रूपाऽपनोदे भात्यतन्त्रकं**
**वायुलहरीपु वहन्निनदनियन्त्रकरं**
**'रेडियो' नवीनयन्त्रमद्भुतममन्त्रकम्॥**[2]

**शिल्पस्तरस्य प्रयोगः –**

एतेषां रचनाकाराणां शिल्पगतप्रयोगशीलता विशेषतः विलक्षणा अस्ति। शिल्पे अपि — विधा, छन्दोयोजना, भाषा — एषु त्रिषु स्तरेषु श्रीशास्त्रीमहोदयेन अभिनवप्रयोगाः कृताः सन्ति।

**क. विधा–**

भट्टमहोदयस्य रचना-संसारः विराट् अस्ति। महाकाव्यं वर्ज्यं कृत्वा अपि, रचनाया प्रायः सर्वा विधयः — मुक्तककाव्यं, लहरीकाव्यं, लघुकथा, काल्पनिककथा (फंतासी), प्रतीककथा, रूपककथा (एलेगैरी), उपन्यासः, रेडियोनाटकं, नाटकं, ललितनिबन्धः, व्यङ्ग्यलेखः, समस्यापूर्ति, संस्मरणम्, यात्रावृत्तम्, रिपोर्ताज्, विनोदः (चुटकुले), पत्रकारिता च — एषु सर्वेषु समानरूपेण तेन साहित्यसर्जना कृतम्।भट्टमहोदयेन समालोचनात्मकलेखैः तथा आलोचनात्मक टिप्पण्यैः अपि संस्कृतसाहित्यं परिपुष्टम्। एवं च, अन्यभाषासु उत्कृष्टसाहित्येभ्यः संस्कृतेषु बहूनि अनुवादानि अपि तेन कृतानि। शास्त्रीमहोदयस्य कतिपय प्रतिनिधिगद्यरचनाः प्रख्या-पुस्तकमाला अन्तर्गतं प्रकाशितः "षष्ठः स्पन्दः" इत्यस्मिन् "मञ्जुनाथगद्यगौरवम्" इति संकलने समाहिताः सन्ति। विस्मयकरं तु एकस्मिन समये अनेकेषु विधासु रचनाप्रयोगं कुर्वन् अपि, भट्टमहोदयः कुत्रापि दुर्बलः इव न दृश्यते।तत्कालीनप्रचलिते प्रायः सर्वासु विधासु लेखनस्य श्रीभट्टमहोदयस्य एकमेव उद्देश्यः आसीत् — संस्कृतभाषां अन्यभाषासु यथावत् समर्थं जीवितं च सिद्धं कर्तुं तथा एतत् प्रमाणीकर्तुं यत् नवीनतमेषु सर्वासु विधासु अपि संस्कृते साहित्यनिर्माणस्य असीमशक्तिः अद्यापि विद्यमाना अस्ति।

**ख . छन्दयोजना-**

एतत् पूर्वमेव उक्तं यत् भट्टमहोदयस्य पुरतःसमस्याद्वयम्आसीत् — संस्कृतकवितां ब्रजबाषाकवितायाः समक्षं प्रतिष्ठापयितुम्। यत्र ब्रजबाषाछन्दे निहितःमार्दवः, सौन्दर्यं, सरलता, लोकप्रियता च गेयता चतद्युगीनसहृदयसमाजं हर्षविह्वलं कृत्वा आकर्षयति स्म। भट्टमहोदयेनपूर्वककवीनां स्वभावान् ज्ञात्वा संस्कृते ब्रजभाषायाः छन्दसां नवावतरणं कृतम्। ब्रजभाषाकाव्ये कविन्छन्दोऽनुरोधेन शब्द-भङ्गविवर्तनस्य असाधारणसुविधा, अनायासेन उपलभ्यते इति वक्तव्यम्। भट्टमहोदयेन समस्यां स्वीकृत्य सर्वसुन्दरेण निर्वाहितम् ।तथापि काव्यस्य लालित्यं प्रसादगुणश्च न खलितः, छन्दसां बन्धः अपि नभिन्नः, तथा ब्रजभाषायाः लयश्च अविनष्टा अभवत्। अनेनैव कवेः संस्कृतभाषायाः प्रति असाधारणाधिकारः प्रतिभाश्च सहजतया प्रकर्षेण वेद्यमाना दृश्यते।भट्टमहोदयःब्रजबाषायाः प्रायः सर्वेषु छन्देषुरचनां कृतवान्, तेषु प्रत्येक छन्देलयः, यति, अलंकाराणां मर्यादा चसम्यक् पालनं कृतम्।साहित्यवैभवग्रन्थात्घनाक्षरी (कवित्त) छन्देआबद्ध एकं काव्यं उदाहरणरूपेण अधोलिखितं दृश्यते —

**यस्य पदगुम्फंचिरकालाद् रसयन्तो बुधा**
**नित्यनवसंतोषभजन्तोन ह्युदासते**
**यस्य श्रव्यकाव्यं तथा भव्यं दृश्यकाव्यं चाऽपि**
**सूरिजनश्राव्यं, नात्रसंशयः प्रकाशते।**

**विक्रमनरेन्द्रस भारत्नस्याऽस्यकीर्त्तिरियं**
**भूमण्डले भ्रान्ताऽपि च न श्रान्ताऽद्य भासते**
**काव्यकलोल्लासे स्फुरत्प्रतिभाविलासे नूनं**
**श्रीमत्कालिदासे साक्षाद् भारती विभासते॥**

एवमेववैभवत्रये अपि उदाहरणानि सर्वत्रैव सन्ति। जयपुर-वैभवात्अन्यदेकमुदाहरणंयथा–

**चचञ्चन्दिरविमलकु लकीर्तिविमञ्जुलरूप।**
**राज सदा सुखसम्पदा राजज्जयपुरभूप॥**
**राजज्जयपुररज्यज्जन भरसज्जज्जयकर**
**सिध्यद्धिषण विशुध्यद्धरणिविबुध्यद्धतिघर ।**
**विच्छच्छलपरिगच्छच्छमलसदच्छच्छविकर**
**न्यशच्चपलमुदशञ्चरितसुचथच्चचन्दिर॥**[3]

एतेभ्यः सर्वेभ्यः स्पष्टं ज्ञायते यत् भट्टमहोदयस्य संस्कृतछन्देषु काव्यनिर्माणे स्वल्पः अभ्यासः आसीत् इति अनुमानं शुद्धं भ्रान्तिमात्रं स्यात्। संस्कृतछन्देषु तस्य प्रौढरचनाः वैभवत्रये द्रष्टुं शक्यन्ते। “साहित्यवैभवम्” ग्रन्थस्य छन्दोवीथौ षट्सप्ततिः (७६) पद्यानि संस्कृतछन्देष्वेव रचितानि। “गोविन्दवैभवम्” इत्यस्मिन् तु मन्दाक्रान्ता, शिखरिणी इत्यादिषु संस्कृतछन्देषु प्रचुरः प्रयोगः कृतः अस्ति।जयपुरे आयोजिते कस्यचित् अखिलभारतीयसंस्कृतसम्मेलने शिखरिणीछन्दे भट्टमहोदयस्य उत्कृष्टकाव्यरचनया प्रभाविताः आह्लादिताश्च सन्तः विद्वज्जनाः तं “कविशिरोमणि” इति उपाध्या सम्मानितवन्तः।

**ग . अलंकारयोजना –**

ब्रजबाषाछन्देषु रचना अनुप्रासादिशब्दालंकारविना अग्रे नेतुं न शक्यते। सुकविभट्टमहोदयस्य रचनासु शब्दालंकारार्थालंकारयोः उत्कृष्टं गुम्फनम् अस्याः पङ्कत्याः मध्ये द्रष्टुं शक्यते —

**पर्वतवनेषु पुलिनेषु पार्श्वपत्तनेषु**
**पौरोपवनेषु पुरः प्रावृट् प्रतिभासते॥**[4]
**शर्वरीषु शीधुषु शशाङ्कमुखीशृङ्गारेषु**
**शुभ्रशयनेषु शीतशोभा परिशील्यताम्॥**[5]

**घ. भाषासंस्कारः–**

भट्टमहोदयस्य आग्रहः आसीत् यत् स्वयुगस्य यथार्थान्, अपि च वैज्ञानिकप्राविधिकनवीनतां, स्वकाव्येषु अवतारयेत्। “साहित्य-वैभवम्” ग्रन्थस्य “नवयुगवीथी” नाम्नि अंशे वैज्ञानिकोपकरणानां वर्णनं दृश्यते। अत्र प्रश्नः उद्भवति— एतेषां नवीनोपकरणानां तथा भिन्नसंस्कृतीनां सभ्यतानां च संमिश्रणेन नवागतशब्दानां प्रयोगः संस्कृते कथं क्रियेत ?शब्दप्रयोगे यदिनवीनतान भविष्यति, तर्हिनवीनरचनाकथं प्रसारितुं शक्यते? अस्य समाधानार्थं कविनात्रयो मार्गाः स्वीकृताः—

(१) ध्वनिसाम्येन संस्कृतीकरणम्, यथा मोटर इत्यस्य मरुत्तर इति।

(२) संस्कृतव्युत्पत्त्या रूपान्तरणम्, यथा महल इत्यस्य —“महान्तम् उत्सवम् लाति” इति व्युत्पत्त्या।

(३) संज्ञाशब्दानां यथारूपं ग्रहणम्, यथा रेडियो, ग्रामोफोन इत्यादयः।

**उपसंहृतिः–**

उत्कृष्टरचनायाः निकषः अयं भवति यत् — कथ्येन, शिल्पेन, प्रस्तुतीकरणेन च सा रचना साहित्ये किं नूतनं संयोजयति, तस्मात् च साहित्यस्य कियत् संवर्धनं भवति इति। अस्मिन् दृष्टिकोणेन कविशिरोमणिः भट्टमथुरानाथशास्त्री ‘मञ्जुनाथः’ इत्यस्य साहित्यं नूतनसंभावनानां नानाद्वाराणि उद्घाटयति।शास्त्रीमहाभागः स एव व्यक्तित्वविशेषः आसीत् यः स्वस्य समर्थया लेखन्याः प्रभावेन तद्युगीनां संस्कृत-रचनाधर्मितायाः दिशंरुपं चपरिवर्तितवान्।

**सन्दर्भग्रन्थसूची**

मञ्जुनाथवाग्वैजयन्ती देवर्षि कलानाथ शास्त्रीमहोदयः विरचित (भट्टश्रीमथुरानाथशास्त्रिणां कृतित्वविमर्शः)

जयपुरवैभवम् भट्टश्रीमथुरानाथशास्त्रिविरचित

साहित्यवैभवम् भट्टश्रीमथुरानाथशास्त्रिविरचित

**पाद टिप्पणी: -**

1 जयपुरवैभवम्,उत्सववीथी ६२

2 साहित्यवैभवम्,नवयुगवीथी ४९४/१

3 जयपुरवैभवम्,राजवीथी-१२४/२५

4 साहित्यवैभव,षड्ऋतुवीथी -३५

5 साहित्यवैभव,षड्ऋतुवीथी -६८